International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(5): 116-119
© 2017 IJSR
www.anantaajournal.com
Received: 19-07-2017
Accepted: 20-08-2017

**Shubh Chandra Jha**
Research Scholar, Dept. Sanskrit, SCSVMV University, Kanchipuram, Tamil Nadu, India

**Correspondence**
**Shubh Chandra Jha**
Research Scholar, Dept. Sanskrit, SCSVMV University, Kanchipuram, Tamil Nadu, India

# पुराणविमर्शः

**Shubh Chandra Jha**

## प्रस्तावना

अस्मिन् असारे खलु संसारे सर्वेऽपि मानवाः धर्मार्थकाममोक्षाख्यं चतुर्विधपुरुषार्थम् इच्छन्ति तल्लाभाय विद्यते कश्चन सर्वज्ञानमयो हि सः (वेदः)। अतः उक्तम्- वेद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः। परं तादृशस्य वेदस्य अध्यनम्, अर्थावगाहनं च न सामान्यम् एवं न तदध्यनाय समेषामप्यधिकारः वर्तते,

ब्रह्मणक्षत्रियविशस्त्रयो वर्णाः द्विजजातयः।
श्रुतिस्मृतिपुराणोक्तधर्मयोग्यस्तु नेतराः।।[1]

ब्रह्मण-क्षत्रिय-वैश्यः इमे द्विजातयः एतेषामेव श्रुतिस्मृतिपुराणोक्तधर्मस्य अधिकार अस्तीति मन्यन्ते। तेन एतान् सर्वान् विहाय अन्येषां सर्वेषां धर्मार्थकाममोक्ष-लाभाय साक्षात् भगवान् नारायणः (कृष्णद्वैपायनं व्यासं विद्धिं नारायणं प्रभुम्) व्यासरूपेण पुराणां रचनां चकार।

## पुराणम्

पुरा इत्युपसर्गस्य अव्ययत्वात् "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च"[2] इति सूत्रेण पुरा इत्यस्मात् अव्ययात् ट्युप्रत्यये तथा च प्रकृतसूत्रेणैव तुडागमे च कृते पुरा तुट् ट्यु इति जाते चुटू[3] इत्यनेन सूत्रेण ट्युघटकस्य टकारस्य इत्संज्ञा तथा च हलन्त्यम्[4] इति सूत्रेण तुट् घटकस्य टकारस्य इत्संज्ञा भवति, तयोः द्वयोः इत्संज्ञकयोः तस्य लोपः[5] इति सूत्रेण लोपे, युवोरनाकौ[6] इति सूत्रेण यु इत्यस्य अनादेशे विभक्तिकार्ये च पुरातनम् इति निष्पद्यते पुरातनशब्दस्य आर्षत्वात् निपातनात् वा पुराणमिति रूपं भवति। तत्र सूत्रकारस्य सूत्रमेव प्रमाणं पुराणप्रोक्तेषु ब्राह्मणकल्पेषु[7] इति सूत्रं तत्र पुराणशब्दस्य प्रयोगात्, तथा च तत्र "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" इति सूत्रेण प्राप्तस्य तुटः अदर्शनात् तुडागमस्याभावात्।

---

1. व्याससस्मृति. १.५
2. सि. कौ. ३१९१, अ. ४.३.२३
3. सि. कौ. १८९, अ.१.३.७
4. सि. कौ. १, अ.१.३.३
5. सि. कौ. ६२, अ.१.३.९
6. सि. कौ. १२४७, अ.७.१.१
7. सि. कौ. १४८५, अ.४.३.१०५

**पुराणशब्दनिर्वचनानि-**

पुरातनोति विस्तारयतीति पुराणम्।

पुरा परम्परया वष्टि पुराणं तेन तत् स्मृतम्। [8]

यस्मात् पुरा ह्यनतीदं पुराणं तेन तत् स्मृतम्। [9]

यस्मात् पुरा ह्यभूच्चैतत् पुराणं तेन तत् स्मृतम्(ब्रह्मण्ड.पु) इत्यादीनि पुराणस्य निर्वचनानि विभिन्नेषु पुराणेषु दत्तानि भवन्ति। तादृशानां पुराणानां रचना भगवता व्यासेन कृतं भवति ते साक्षात् नारायणस्य अवतारः आसन् यथोक्तम्- कृष्णद्वैपायनं व्यासं विद्धिं नारायणं प्रभुम्

। एतावता किं नाम पुराणमित्यस्माभिरालोचितं तर्हि किं तस्य लक्षणमिति परिशीलयामः-

**पुराणलक्षणम्-**

द्विविधं पुराणलक्षणं दृष्यते।पुराणस्य पंचलक्षणम्,तथा पुराणस्य दशलक्षणम् । तत्र प्रथमम्

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितं चेति पुराणं पञ्चलक्षणम्।। [10]

पुराणं कीदृशं भवेदिति स्मयमानः भगवान् वादरायणः पुराणस्य लक्षणमित्थमकार्षीत् यत् पुराणं सर्गेण, प्रतिसर्गेण, वंशवर्णेन, मन्वन्तरेण, वंशानुचरितेन च युक्तं भवेदिति। इमानि सर्गादीनि पुराणस्य पञ्चलक्षणानि निगदितानि।

**तत्र सर्गो नाम**

अव्याकृतगुणक्षोभात् महतस्त्रिवृतोऽहमः।

भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्चते।। [11]

अव्याकृतगुणक्षोभात् महतः उत्पत्तिः जायते, तस्मात् सत्त्व-रज-तमो गुणानां तस्मात् अहंकारः तस्मात् पञ्चतन्मात्राणि पञ्चेन्द्रियानि एवं पञ्चभूतानामुत्पत्तिः भवति। स एव सर्ग इत्युच्यते।

**प्रतिसर्गो नाम**

नैमित्तिकः प्राकृतिको नित्य आत्यान्तिको लयः।

संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः।। [12]

प्रतिसर्गो नाम प्रलयः नाशः, स च नाशः प्रलयः कविभिः चतुर्धा प्रोक्तः भवति । ते च नाशाः इमे नित्य,नैमित्तिकः, प्राकृतिकः, आत्यान्तिकः, एतेषां चतुर्णामेव संस्था इति पदेन अपि व्यवहारः।

**वंशः**

राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः। [13]

तत्र राज्ञां वंशपरम्परायां ब्रह्मप्रसूतानां विवेचनमेव वंश इत्यनेन गृह्यते।

**मन्वन्तरम्**

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।

ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते।। [14]

अर्थात् मनुः, देवताः, मनुपुत्राः, इन्द्रः, सप्तर्षयः, अंशावतार उपरोक्तषड्विशिष्टयुक्तकालस्य नाम एव मन्वन्तरं भवति।

**वंशानुचरितम्**

वंशानुस्खाचरितं तेषां वृत्तं वंशधराश्च ये। [15]

अर्थात् वंशपरम्परायाः क्रमस्य वर्णनं यस्मिन् तद्भवति वंशानुचरितं यथा - राजा दशरथः तस्य अपत्यं रामः, तस्य अपत्यं कुशादयः एवं रीत्या वंशेसमुद्भूतानां राज्ञां वर्णनमेव वंशानुचरितमित्युच्यते। एवं विधा पुराणस्य पञ्चलक्षणस्य परिचयः वर्तते। अन्यत्र केषुचित् पुराणेषु दशलक्षणानि अपि प्रोक्तानि तद्यथा-

---

[8] .पद्मपु. ५.२.५३

[9] . वायु.१.१०३

[10] विष्णुपु.३.६.२४, भपु. २.५

[11] .भा. पु. १२.७.११

[12] . .भा. पु. १२.७.१७

[13] .भा. पु. १२.७.१६

[14] .भा. पु. १२.७.१५

[15] .भा. पु. १२.७.१६

**पुराणस्य दशलक्षणम्**

सर्गश्चाथविसर्गश्च वृत्ति रक्षान्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः।। [16]

परं प्रकृतश्लोके वर्णितानां दशलक्षणानामन्तर्भावः उपर्युक्तपञ्चलक्षणेषु भवतुमर्हति इति विदुषामाशयः तथापि दशलक्षणानि अपि वर्णितानि इति तेन न काऽपि बाधा। अत उभयविधलक्षणयुक्तानि पुराणानि। उपर्युक्तलक्षणयुक्तानि अष्टादशपुराणानि वर्तन्ते तानि इमानि-

**अष्टादशपुराणानि**

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक्।। (देवी.१.३.२१)

**मद्वयम्–** इत्यनेन मकारादिपुराणद्वयस्य ग्रहणं तद्यथा- १. मत्स्यपुराणम् २. मार्कण्डेयपुराणम्।

**भद्वयम्-** इत्यनेन भकारादिपुराणद्वयस्य ग्रहणं तद्यथा-३. भागवतपुराणम्, ४. भविष्यपुरामम्।

**ब्रत्रयम्-** इत्यनेन ब्र-कारादिपुराणत्रयस्य ग्रहणं तद्यथा- ५. ब्रह्मपुराणम्, ६. ब्रह्मवैवर्तपुराणम्, ७. ब्रह्मण्डपुराणम्।

**वचतुष्टयम्-** इत्यनेन वकारादिचत्वारि पुराणानि गृह्यन्ते तद्यथा – ८. वामनपुराणम्, ९. विष्णुपुराणम्, १०. वाराहपुराणम्, ११. वायुपुराणम्।
अकारेण १२. अग्निपुराणं गृह्यते, ना इत्यनेन – १३. नारदपुराणम् पकारेण - १४. पद्मपुराणम्, लित्यनेन – १५. लिङ्गपुराणम्, गकारेण - १६. गरुडपुराणम्, कू इत्यनेन -१७. कूर्मपुराणं तथा च स्क इत्यनेन -१८. स्कन्दपुराणस्य ग्रहणं भवति। अनया रीत्या एकेन श्लोकेण स्वीय अष्टादशानां कृतिनां विवेचनं चमत्कारपूर्वकं निदर्शितम्।।।
तर्हि एतेषामष्टादशानां पुराणानां रचनायाः का आवश्यकता इति शंङ्कायाः निवृत्तये इत्थं बभाष महर्षिः

**प्रयोजनम्**

स्त्री-शूद्र-द्विजबन्धूनां न वेदश्रवणं मतम्।
तेषामेव हितार्थाय पुराणानि कृतानि च।।(भागवते)

शास्त्रे समेषां जनानां वेदश्रवणे अधिकारः न दत्तः यथा स्त्रीणां, शूद्राणां, द्विजबन्धुनां(जन्मना ब्रह्मणः, कर्मणा अब्रह्मणः स द्विजबन्धुः) एतेषां जनानां वेदपठनाय श्रवणाय च अर्हता नास्ति अतः तेभ्यः जनेभ्यः अर्थात् स्त्रीशूद्रद्विजवन्धुभ्यः हिताय पुराणास्य रचना कृताऽस्ति। येन वेदश्रवणस्य अनधिकारे अपि पुराणश्रवणेन तेषाम् आत्मज्ञानं तज्जन्यमोक्षोपलब्धिः स्यात् इत्येतदर्थं मया पुराणां रचना कृता भवतीति भावः। न तावदेव अपितु वेदार्थं ज्ञातुं महानक्लेशः वैदिकानां शब्दानां ज्ञानाभावात् । अतः वेदार्थनिर्णये समेषां हिताय वर्तते यथोक्तम्-

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
विभेति अल्पश्रुतात् वेदः मामयं प्रहरिष्यति। । [17]

अर्थात् इतिहासश्च पुराणञ्च इतिहासपुराणे, ताभ्याम् इतिहासपुराणाभ्याम्, वेदस्य अर्थं जानीयात् वेदस्य व्याख्यानं वा कुर्यात्। यतः अल्पज्ञमनुष्येभ्यः वेदः विभेति माम् अयं जनः प्रहरिष्यतीति अर्थात् अनर्थं व्याख्यास्यति। अतः पुराणपरिशीलनेन वेदार्थं सुकरः भवतीति भावः।

**पुराणस्य महत्वम्**

वेदार्थादधिकं मन्ये पुराणार्थं वरानने।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।। (नारदीये)

सर्वेऽपि वेदाः नाम चत्वारोऽपि वेदाः पुराणेष्वेवान्तर्भवन्ति नाम पुराणेषु तेषां वेदानां व्याख्यानं वर्तते इति आशयः। तथा पठितुमपि सुकरं भवति तस्मात् पुराणमध्येतव्यं वेदार्थज्ञानाय इति भावः अर्थात् वेदार्थज्ञानाय पुराणमेव शरणं भवति इत्यर्थः ।

**पुराणस्य वेदत्वम्-**

पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम्।। (स्क.पु)
यन्न दृष्टं हि वेदेषु तद् दृष्टं स्मृतिभिः किल।
उभाभ्यां यन्न दृष्टं हि तत् पुराणेषु गीयते।(स्क.पु)

---

[16] . .भा. पु. १२.७.९

[17] .महाभारते आदिपर्वणि.१.८३

पुराणं पञ्चमवेदत्वेन भवति इति ब्रह्मानुशासनं वर्तते। वेदे येषामुपलब्धिः न वर्तते तेषामुपलब्धिः स्मृतौ लभ्यते तथा च यस्योपलब्धिः वेदे स्मृतौ च न लभ्यते तस्यापि उपलब्धिः पुराणेषु विद्यते।

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम्।।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।
आत्मा पुराणां वेदानां पृथक् अङ्गानि तानि षट्।।

वेदे प्रतिपाद्यसर्वोऽपि विषयः पुराणेषु उपलभ्यन्ते। अतः पुराणं वेदानाम् आत्मा इव भवति। एवं शिक्षा व्याकरणादीनि अङ्गानि भवन्ति।

**उपसंहार**

अस्मिन् जगति सर्वेऽपि मानवाः मोक्षं वाञ्छन्ति तत्साधयितुं कश्चन विशिष्टग्रन्थः विद्यते वेदः (श्रुतिः) यस्मिन् चतुरोऽपि पुरुषार्थाः विद्यन्ते अतः उक्तम्- वेद्यन्ते धर्मादयः पुरुषार्थास्यैस्ते वेदाः परं तादृशस्य वेदस्य अध्यनाध्यापनमर्थज्ञानं साधयितु न सुलभः तथा च न सर्वेषां तत्र अध्ययने श्रवणे अधिकारो वर्तते तर्हि कथं जनानां सामान्येन सौकर्येण चतुर्णां पुरुषार्थाणां फलप्राप्तिः भवेत् इति चिन्तयन् भगवान् द्वापरे-द्वापरे युगे अवतीर्य पुराणारचनामकार्षीत्।तादृशस्य पुराणस्य व्युत्पत्तिः का? किं तस्य लक्षणम्? कानि तानि पुराणानि? तस्य प्रयोजनं किम्? तस्य किं महत्वम्? तथा च तस्मिन् पुराणे एव चतुर्णां वेदानामन्तर्भावः इमे मुख्याः विचाराः सप्रमाणं कृतं भवति॥ इति॥

**उपयुक्तग्रन्थसूची**


1. वैयाकरणसिद्धिन्तकौमुदी (वासुदेवदीक्षितप्रणीत बालमनोरमा-व्याख्या, गोविन्दाचार्यकृत हिन्दीव्याख्या)
2. पुराणविमर्शः (आचार्यबलदेव उपाध्याय, चौखम्भा विद्याभवन वाराणसी)
3. श्रीमद्भागवतमहापुराणम् (गूढार्थदीपिका टीका सहितम्, आचार्य पं. श्रीराममूर्तिशास्त्री पौराणिकः, काशीस्थ गोनका संस्कृतमहाविद्यालय, श्री पौराणिककार्यालय वाराणसी।
4. पद्मपुराणम् (श्रीमद्रविषेणाचार्यप्रणीत हिन्दीभाषानुवादितः, भारतीयज्ञानपीठ काशी।
5. मत्सपुराणम् (मूलपाठ, हिन्दी-अनुवाद एवं श्लोकानुक्रमिकासहित, डा. श्रद्धा शुक्ला, नाग पब्लिशर्स ११ ए. यू. जवाहरनगर, दिलली ११०००७ भारत।
6. महाभारतम्, व्यासस्मृतादिग्रन्थमवलोक्यसङ्गृहीतम्।
7. विष्णुपुराणम् (हिन्दी-अनुवादसहित, डा. श्रद्धा शुक्ला, संस्कृत विभाग, मिराङ हाउस,नाग पब्लिशर्स ११ ए. यू. जवाहरनगर, दिलली ११०००७ भारत।